चौरं सर्पिस्तु नैवेद्यं देयं सर्पविषापहम् ॥'
मनसाध्यानम्। यथा, पद्मपुराणे।
'देवीमम्बामहीनां शशधरवदनां चारुकान्तिं वदान्यां
हंसारूढ़ामुदारामरुणितवसनां सर्व्वदां सर्व्वदैव।
स्मेरास्यां मण्डिताङ्गीं कनकमणिगणैर्नागरत्नैरनेकै-
र्वन्देऽहं साष्टनागामुरुकुचयुगलां भोगिनीं कामरूपाम् ॥'
पुराणान्तरे।
'अनन्तो वासुकिः पद्मो महापद्मोऽथ तक्षकः।
कुलीरः कर्कटः शङ्खो ह्यष्टौ नागाः प्रकीर्त्तिताः॥
शेषः पद्मो महापद्मः कुलिकः शङ्खपालकः।
वासुकिस्तक्षकश्चैव कालीयो मणिभद्रकः॥
ऐरावतो धृतराष्ट्रः कर्कोटकधनञ्जयौ॥'
गारुड़ेऽपि।
'अनन्तं वासुकिं शङ्खं पद्मं कम्बलमेव च।
तथा कर्कोटकं नागं धृतराष्ट्रञ्च शङ्खकम्॥
कालीयं तक्षकञ्चापि पिङ्गलं मणिभद्रकम्।
यजेत्तानसितान्नागान् दध्युक्तो दिवं व्रजेत्॥'
अन्न च।
'योऽसौ चानन्तरूपेण ब्रह्माण्डं सचराचरम्।
पुष्पवद्धारयेन्मूर्ध्नि तस्मै नित्यं नमो नमः॥'
इत्यनेन प्रणवपूर्व्वेण मत्स्यपुराणोक्तेनानन्तं पूजयेत्॥ रत्नाकरे।
'पिचुमर्द्दस्य पत्राणि २ प्रयेद्भवनोदरे।
स्वयञ्चापि तदश्नीयात् ब्राह्मणांश्चैव भोजयेत्॥'
पिचुमर्द्दः निम्बः॥" इति तिथ्यादितत्त्वम्॥
**नागपत्रा,** स्त्री, (नागदमनं पत्रं यस्याः। टाप्।) नागदमनी। इति भावप्रकाशः॥
**नागपत्री,** स्त्री, (नागवत् पत्रं यस्याः। ङीष्।) लक्ष्मणा। इति राजनिर्घण्टः॥
**नागपदः,** पुं, (नागवत् पदं स्थानं यस्य।) षोड़शरतिबन्धान्तर्गतद्वितीयबन्धः। तस्य लक्षणं यथा,—
"पादौ स्कन्धे तथा हस्ते क्षिपेल्लिङ्गं भगे लघु।
कामयेत् कामुको नारीं बन्धो नागपदो मतः॥"
इति रतिमञ्जरी॥
**नागपाशः,** पुं, (नागपाश इव आकृतिरस्यास्तीति। अच्।) स्त्रीणां करणम्। (नागः पाश इव।) वरुणायुधः। इति मेदिनी। शे, ३५॥
"शार्ङ्गद्वयावर्त्तनात् नागपाश इति स्मृतः।
ब्रह्मयन्त्रिमथो दद्यान्नागपाशमथापि वा॥"
इत्यागमः॥
"वेष्टितं नागपाशेन भ्रुकुटीभीषणाननम्॥"
इति देवीपुराणीयदुर्गाध्यानम्॥
**नागपाशकः,** पुं, (नागपाश इव प्रतिकृतिः। "इवे प्रतिकृतौ।" ५।३।९६। इति कन्। यद्वा, नागपाश इव कायतीति। कै+कः।) रतिबन्धविशेषः। तस्य लक्षणं यथा,—
"स्वजङ्घाद्वयमध्यस्थौ हस्ताभ्यां धारयेत् कुचौ।
इमैनिःपीड़ितः कामी बन्धोऽयं नागपाशकः॥"
इति रतिमञ्जरी॥
**नागपुरं,** क्ली, (नागनामकं पुरम्। शाकपार्थिवादिवत् समासः।) देशविशेषः। तद्विवरणं यथा,—
"जटाजूटात् पपातोर्द्ध मेरोस्तस्मात्ततोऽगमत्।
देवैः परिहृता गङ्गा हेमकूटञ्च पर्व्वतम्॥
मन्दरञ्चैव कैलासं हिमवन्तञ्च पर्व्वतम्।
तामायान्तीन्तु रोधाय खलीलो नाम दानवः॥
पार्व्वतं रूपमास्थाय वर्षाणान्तु शतद्वयम्।
ततो भगीरथो राजाराधयामास कौशिकम्॥
स तुष्टः प्रददौ नागं वाहनं तं भगीरथः।
समारुह्यागमत्तत्र यत्र रुद्धा भगीरथी॥
तेन नागेन तं दैत्यं संविदार्य्य स सङ्गतः।
शतधा तं समाधाय सहैर्ऐरावतो गजः॥
महीतलं समापेदे स यावन्नागसाश्रयम्॥
तस्मात् श्वावटनाद्विप्रा अभून्नागपुरं वरम्॥"
इति वह्निपुराणे गङ्गावतरणनामाध्यायः॥
**नागपुष्पः,** पुं, (नागस्य हस्तिनो मदगन्धयुक्तं पुष्पं यस्य।) पुन्नागवृक्षः। नागकेशरः। (यथा, महाभारते। १। २०८। ४०।
"पुन्नागैर्नागपुष्पैश्च लकुचैः पनसैस्तथा॥")
चम्पकः। इति मेदिनी। पे, २५॥ (पुन्नागपुष्पे तु क्ली। तत्र गुणा यथा,—
"नागपुष्पं कषायोष्णं रूक्षं लघ्वामपाचनम्।
ज्वरकण्डूतृषास्वेदच्छर्द्दिहृल्लासनाशनम्॥
दौर्गन्ध्यकुष्ठवीसर्पकफपित्तविषापहम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
**नागपुष्पफला,** स्त्री, (नागस्य नागकेशरस्येव पुष्पफले यस्याः।) कुष्माण्डी। इति राजनिर्घण्टः॥
**नागपुष्पिका,** स्त्री, (नागस्य पुष्पमिव पुष्पं यस्याः। कप्। टापि अत इत्वम्।) स्वर्णयूथी। इति राजनिर्घण्टः॥
**नागपुष्पी,** स्त्री, (नागस्य नागकेशरस्य पुष्पमिव पुष्पं यस्याः। ङीष्।) नागदमनी। इति भावप्रकाशः॥ (पर्य्यायोऽस्या यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"नागपुष्पी श्वेतपुष्पा नागिनी रामदूतिका॥"
अस्या गुणा। यथा,—
"नागिनी रोचनी तिक्ता तीक्ष्णोष्णा कफपित्तनुत्॥")
**नागफलः,** पुं, (नागस्य पुन्नागस्येव फलं यस्य।) पटोलः। इति राजनिर्घण्टः॥
**नागबन्धुः,** पुं, (नागानां हस्तिनां बन्धुरिव प्रियत्वात्।) अश्वत्थवृक्षः। इति शब्दचन्द्रिका॥ नागानां बान्धवश्च॥
**नागबलः,** पुं, (नागानामिव बलं यस्य।) भीमसेनः। इति त्रिकाण्डशेषः॥ (अस्य नागबलाप्तिकथा। यथा, महाभारते। १। १२८। ६५—७०।
"एवमुक्तस्तदा नागो वासुकिं प्रत्यभाषत।
यदि नागेन्द्र! तुष्टोऽसि किमस्य धनसञ्चयैः॥
रसं पिबेत् कुमारोऽयं त्वयि प्रीते महाबलः।
बलं नागसहस्रस्य यस्मिन् कुण्डे प्रतिष्ठितम्॥
यावत् पिबति बालोऽयं तावदस्मै प्रदीयताम्।
एवमस्त्विति तं नागं वासुकिः प्रत्यभाषत॥
ततो भीमस्तदा नागैः कृतस्वस्त्ययनः शुचिः।
प्राङ्मुखश्चोपविष्टः स रसं पिबति पाण्डवः॥
एकोच्छ्वासात्ततः कुण्डं पिबति स्म महाबलः।
एवमष्टौ स कुण्डानि ह्यपिबत् पाण्डुनन्दनः॥
ततस्तु शयने दिव्ये नागदत्ते महाभुजः।
अशेत भीमसेनस्तु यथासुखमरिन्दमः॥"
तथा च तत्रैव। १। १२९। १९—२१।
"ततोऽष्टमे तु दिवसे प्रत्यबुध्यत पाण्डवः।
तस्मिंस्तदा रसे जीर्णे सोऽप्रमेयबलो बली॥
तं दृष्ट्वा प्रतिबुध्यन्तं पाण्डवं ते भुजङ्गमाः।
सान्त्वयामासुरव्यग्रा वचनञ्चेदमब्रुवन्॥
यत्ते पीतो महाबाहो! रसोऽयं वीर्य्यसम्भृतः।
तस्मान्नागायुतबलो रणेऽधृष्यो भविष्यति॥")
हस्तितुल्यबलवति, त्रि॥
**नागबला,** (नागस्येव बलं यस्याः।) बलाप्रभेदः। गोरक् चाउलिया इति गुलशकरी इति ककही इति च भाषा। (यथा, गारुड़े १७९ अध्याये।
"जम्भा नागबला चूर्णं श्वासकासादिहृद्भवेत्॥")
तत्पर्य्यायः। गाङ्गेरुकी २ झषा ३ ह्रस्वगवेधुका ४। इत्यमरः। २। ४। ११७॥ गाङ्गेरुकी ५ गोरक्षतण्डुला६। इति भरतः॥ भद्रोदनी ७ खरगन्धा ८ चतुःपला ९ महोदया १० महापत्रा ११ महाशाखा १२ महाफला १३ विश्वदेवा १४ अरिष्टा १५ देवदण्डा १६ महागन्धा १७ घण्टा १८। अस्या गुणाः। मधुराम्लत्वम्। कषायत्वम्। उष्णत्वम्। गुरुत्वम्। कण्डूतिकुष्ठवातघ्नपित्तनाशित्वञ्च। इति राजनिर्घण्टः॥ स्निग्धत्वम्। आयुष्यत्वम्। वृष्यत्वम्। ग्राहित्वम्। क्षतक्षीणक्षयरोगेषु हितत्वञ्च। इति राजवल्लभः॥
**नागभृत्,** पुं, (नागः क्रूरचारी सन् बिभर्त्ति आत्मानमिति। भृ+क्विप्।) कुक्कुरसर्पः। इति त्रिकाण्डशेषः॥
**नागमल्लः,** पुं, (नागेषु हस्तिषु मल्लः।) ऐरावतः। इति शब्दरत्नावली॥
**नागमाता,** [ऋ] स्त्री, (नागानां हस्तिनां मातेव शुभवत्वात्।) मनःशिला। इति हेमचन्द्रः। ४। १२९॥ (नागानां सर्पाणां माता।) मनसादेवी। इति शब्दरत्नावली॥ (यथा, ब्रह्मवैवर्त्ते। २। १। ९७।
"नागेश्वरस्यानन्तस्य भगिनी नागपूजिता।
नागेश्वरी नागमाता सुन्दरी नागवाहिनी॥"
सुरसा। इयं हि सागरोल्लङ्घनसमये हनुमतः परीक्षार्थं देवैरादिष्टा तस्य विघ्नमाचरितुं गता तेन वञ्चिता च। यथा, रामायणे। ५।१।१३९।
"ततो देवाः सगन्धर्व्वाः सिद्धाश्च परमर्षयः।
अब्रुवन् सूर्य्यसङ्काशां सुरसां नागमातरम्॥"
यथा, च अध्यात्मरामायणे। ५। १। ८—२३।